संयोग इति विजातीयतेजःसंयोग इत्यर्थः तेनेति विजातीयतेजःसंयोगेनेत्यर्थः पूर्वरूपं नश्यतीति पूर्व
रूपनाशो भवतीत्यर्थः इत्यर्थ इति अयमेव पाकजशब्दार्थ इत्यर्थः मतभेदेन पाकज[illegible]स्थलमुदा
हरति अत्रेति पाकः कुत्रेत्याकांक्षायामित्यर्थः पाक इति पूर्वरूपनाशपूर्वकरूपांतरोत्पादकते
जः तेजःसंयोग इत्यर्थः एवमग्रेपि परमाणुष्वेवेत्येवकारस्य व्यवच्छेद्यं स्वयमेव विवृणोति न
द्व्यणुकादाविति आदिनाऽवयविमात्रपरिग्रहः एतत्पीलुपाकवादिन इत्युत्तरेणान्वयः ति
उक्तार्थमुपपादयति आवश्यकत्वादिति अग्निसंयोगविशेषस्यापित इत्यर्थः घट इति त
तित्रस्थपरमाणुषु रूपांतरोत्पत्तौ श्यामघटनाश इति श्यामघटनाशे रूपांतरोत्पत्ताविति यो
जना श्यामघटनाश इति द्व्यणुकादिनाशक्रमेण श्यामघटनाशे सतीत्यर्थः तदनंतरमिति नं
शेषः रूपांतरोत्पत्ताविति रूपादिचतुष्टयनाशपूर्वकरूपादिचतुष्टयोत्पत्तौ सत्यामित्यर्थः

६ तदनंतरमिति शेषः पुनरिति अग्निसंयोगादित्यर्थः द्व्यणुकादिक्रमेणारक्तघटोत्पत्तिरिति रक्तरू
पविशिष्टद्व्यणुकाद्युत्पत्त्या घटाद्युत्पत्तिरित्यर्थः अयंभावः अग्नियंत्रनिहिते घटे तेजःसंयोगा
नंतरं तादृशघटारंभकेषु यावदवयवेषु रूपांतरोत्पत्तिमंतरा घटे पूर्वरूपनाशपूर्वकरूपांत
रोत्पत्तिर्न संभवति अनुभवविरोधात् नहि घटे रक्तोत्पत्त्यनंतरं अवयवा नीलाः संतो दृश्यंते
त्र यावदवयवेष्वपि रूपांतरोत्पत्तिर्न संभवति घटस्यारब्धद्रव्यत्वेन वह्नेस्तदवयवानां अंतःप्र
वेशासंभवेन घटारंभकयावदवयवेषु वन्हेरवयवसंयोगस्य वाधितत्वात् परं त्वग्निसंयोगा
धीनपरमाणुक्रियया परमाणुद्वयविभागजन्यारंभकसंयोगनाशपूर्वकद्व्यणुकादिना
शक्रमेण महदवयविनाशे सति पुनरपि अग्निसंयोगात्परमाणौ श्यामनाशपूर्वकरक्तो
त्पत्तौ पुनः स्वांतरसंयोगात् परमाण्वोर्द्व्यारंभानुगुणक्रियया परमाणुद्वयसंयोगे राम